# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – शास्त्री-3** | **प्रश्नपत्रम् – 7** | **गुणाः – ५०** |
| **विषयः – वेदः** | **सत्रम् – 6** | **समयः – १० तः १२** |
| **दिनाङ्कः – २०/०७/२०२१** | **सन्दर्भग्रन्थः – पारस्करगृह्यसूत्रम्** | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः सूत्रयोः व्याख्या कार्या ।**

१ अथातो गृह्यस्थालीपाकानां कर्म ।
२ पञ्चमहायज्ञा इति श्रुतेः ।
३ षडर्घ्या भवन्ति- आचार्य ऋत्विग्वैवाह्यो राजा प्रियः स्नातक इति ।

**प्रश्नः २ ग्रन्थोक्तदिशानुसारं कुशकण्डिका वर्ण्यताम् ।**

**प्रश्नः ३ ब्रह्मचर्यविधानं सम्यक् प्रस्तूयताम् ।**

**प्रश्नः ४ कयोरपि द्वयोः सूत्रयोः व्याख्या कार्या ।**

१ स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति ।
२ प्रथमगर्भे मासे षष्ठेऽष्टमे वा ।
३ जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननाऽयुष्ये करोति ।

**प्रश्नः ५ ग्रन्थोक्तदिशानुसारं चतुर्थीकर्मं विवेच्यताम् ।**

**प्रश्नः ६ अन्नप्राशनं सम्यक् प्रस्तूयताम् ।**

**प्रश्नः ७ कयोरपि द्वयोः सूत्रयोः ससन्दर्भं व्याख्या कार्या ।**

१ षोडशवर्षस्य केशान्तः ।
२ अष्टवर्षं ब्राह्मणमुपनयेद् गर्भाष्टमे वा ।
३ त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनं च ।

**प्रश्नः ८ ग्रन्थोक्तदिशानुसारं पञ्चमहायज्ञविधिः वर्ण्यताम् ।**

**प्रश्नः ९ श्रवणाकर्म सम्यक् प्रस्तूयताम् ।**

**प्रश्नः १० दशानां प्रश्नानामुत्तरं लिखत ।**

१ अर्घ्याः कति भवन्ति ?
२ श्रुतौ कति महायज्ञाः प्रोक्ताः ?
३ पारस्करगृह्यसूत्रं केन वेदेन सम्बन्धितम् ?
४ विवाहविधिः कस्मिन् काण्डे वर्णितः ?
५ पारस्करगृह्यसूत्रम् इति ग्रन्थः कति काण्डात्मको वर्तते ?
६ 'पारस्करगृह्यसूत्रस्य' रचयिता कः ?
७ पाकयज्ञाः कति सन्ति ? के च ते ?
८ सीमन्तोन्नयनं कदा भवति ?
९ वात्सप्र अनुवाकस्य पठनं कथं भवति ?
१० कुमारस्य बहिर्निष्क्रमणं कस्मिन् मासे भवति ?
११ षोडशवर्षस्य कुमारस्य कः संस्कारः भवति ?
१२ ब्राह्मणादिवर्णानुक्रमेण उपनयनकालः कः ?
१३ ब्राह्मणस्य दण्डः कः ?
१४ स्नातकभेदाः कति सन्ति ? के च ते ?
१५ पारस्करगृह्यसूत्रस्य अपरं नाम किम् ?

****